अश्मकुट्टकोऽप्यत्र । "दन्तोलूखलिकः कालपक्काशी वाश्मकुट्टकः" या० स्मृतिः ।

**अश्मकेतु** स्त्री अश्मेव केतुरस्य । क्षुद्रपाषाणभेदवृक्षे ।

**अश्मगन्धा** अश्मन इव गन्धो लेशोऽस्याः । पृश्निपर्णीलक्षणायामासन्धौ लतायाम् । "विशाखशयावाश्मगन्धापृश्निपर्ण्यध्यण्डाश्च" कात्या० २०,७,१७, "अश्मगन्धा आसन्धिः पृश्निपर्णीलक्षणेति" कर्क० । "न शरं नाश्मगन्धां नाध्यण्डां न पृश्निपर्णीं नाश्वत्थशान्तिके कुर्य्यात्" शत०ब्रा० । [मरकतमणौ । राजनि० ।

**अश्मगर्भ** पु० अश्मेव क्षतो गर्भोऽस्य । "पन्ना इति" ख्याते

**अश्मगर्भज** पु० अश्मगर्भाज्जायते जन–ड ५त० । मरकतमणौ अश्मयोनिरप्यत्र" राजनि० २प्रस्तरजे वह्नौ पु० ।

**अश्मगुड** पु० अश्मनिर्म्मितो गुडः गोलाकारः पदार्थः । प्रस्तरनिर्म्मिते (गुली) प्रसिद्धे युद्धसाधने अस्त्रभेदे स्त्रीत्वमपि "स्थूलान् भुशुण्ड्यश्मगुडाः स्थूलाः कार्ष्णायसीस्तथा" भा०द्रो०प० । भुशण्डीनिर्मुक्ता अश्मगुडास्तदर्थः ।

**अश्मघ्न** पु० अश्मानं हन्ति हन–ड । पाषाणभेदवृक्षे ।

**अश्मज** न०अश्मनो जायते जन–ड ५त० । प्रस्तरजाते १शिलाजतुनि, । अश्मेव जायते जन–ड । २लौहे च ।

**अश्मजतु** न० अश्मनो जायते जन–तुन् डिच्च । शिलाजतुनि स्वार्थे कन् अश्मजतुकं तत्रैव ।

**अश्मजाति** स्त्री अश्मनो जातिः सामान्यमस्य । "पान्ना"ख्याते मरकतमणौ । अश्मन इव जातिरस्य । रत्नमात्रे अमरः रत्नानि च । "वज्रं गारुत्मतं पुष्परागो माणिक्यमेव च । इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमेव च । मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव" भाव०प्र०। "मुक्ताफलं हीरकं च वैदूर्यं पद्मरागकम् । पुष्परागं च गोमेदं नीलं गारुत्मतं तथा । प्रबालयुक्तान्येतानि महारत्नानि वै नव" विष्णु ध० । अत्र पुष्परागादीनां क्लीबताऽपि । अत्र चैषां महारत्नतैतोक्तेः तद्भिन्नानामपि रत्नत्वमस्त्येव यथोक्तं गारुडे "तेषु रक्षोविषव्याधिव्यालघ्नान्यघहानि च । प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च । वज्रं मुक्ता मणयः पद्मरागाः समरकताश्च प्रोक्ताः । अपि चेन्द्रनीलमणयो वैदूर्याः पुष्परागाश्च । कर्केतनकुरुविन्दौ रुधिराक्षसमन्वितं स्फटिकम् । विद्रुममणिश्च" ।

**अश्मदारण** पु० अश्मानं दारयति दृ–णिच्–ल्यु । पाषाणभेदके टङ्कनामास्त्रे ।

**अश्मदिद्यु** त्रि० अतिशयेन द्योतते यङ् लुक् बा० ड विद्यु आयुधम् अश्म व्यापकं अश्ममयं वा दिद्यु यस्य । अश्ममयायुधयुक्ते । "विद्युन्महसो नरो अश्मदिद्यवः" ५,५४।३ । अश्मदिद्युवो व्याप्तायुधाः अश्ममयायुधा वा" भा०।

**अश्मन्** पु० अश्नुते व्याप्नोति, संहन्त्यनेन वा कर्त्तरि करणे वा मनिन् । पाषाणे । "अथ यदस्य संक्षरितमासीत् सोऽश्म पृश्निरभवत्" शत०ब्रा० । "इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना" ऋ०१।१९१।१५ । "अशिशकिभ्यां छन्दसि" इत्युक्तेः वेदेऽस्य भूरिप्रयोगः क्वचित् लोकेऽपि "नाराचक्षेपणीयाश्मनिष्पेषपतितानलम्" रघुः । दन्तोलूखलिकः कालपक्काशी वाश्मकुट्टकः" या० "अश्मानं दृषदं मन्ये मन्ये काष्ठमुदूखलम् । अन्धायाश्च सुतं मन्ये यस्य माता न पश्यति" जिनेन्द्रः । २मेघे निरु० तस्याम्बरव्यापकत्वात्तथात्वम् ३भूमिव्यापके पर्व्वते पु० । "अश्मानं चिद्ये बिभिदुः" ऋ० ४,१६,६ । "अश्मानं पर्व्वतं मेघं वा" भा० । "अश्मानं चिच्छवसा दिद्युतः ऋ० ५।३०।४। "अश्मानं पर्व्वतम्" भा० । ४व्यापके त्रि० अश्मदिद्युशब्दे उदा० । त०स० उत्तरपदस्थः संज्ञायां जातौ च टचं समासान्तं लभते । संज्ञायाम् पिण्डाश्मः जातौ अमृताश्मः । नित्यसमा० । अश्मना मुसः आश्मनः । ऋश्यादि० चतुरर्थ्यां क । अश्मकः । अश्मादि० चतुरर्थ्यां रः अश्मरः । उत्करा० चतुरर्थ्यां छ । अश्मीयः । तदर्हतीत्यर्थे अश्व । दि० ठण् । आश्मिकः । तत्र कुशल इत्यर्थे आकर्षादि० कन् । अश्मकः । अपलेशुभ्रा०ढक् । आश्मेयः । अश्वा० गोत्रापत्ये फञ् । आश्मायनः । अश्मनोविकारः अण् टिलोपः आश्मः मयट् च अश्ममयः स्त्रियां ङीप् । अवयवार्थे तु न टिलोपः आश्मन इत्येव ।

**अश्मन्त** न० अश्मनोऽन्तोऽत्र शक०पररूपम् । १अशुभे क्षेत्रे, २चुल्ल्याञ्च । अश्नामन्तः । अश्नन्तोऽप्यत्र ।

**अश्मन्तक** पु०न०अश्मानमन्तयति अन्त–णिच् ण्वुल् शक० । १चुल्ल्याम् २दीपाधारे ३छादने,(आउड़)ख्याते तृणविशेषे च । "मुञ्जालाभे तु कर्त्तव्याः कुशाश्मान्तकवल्वजैः" मनुः । ४अम्लोटकवृक्षे, ५अम्लपत्रे ६कोविदारकवृक्षे च पु० ।

**अश्मन्मय** त्रि० अश्मनोविकारः मयट् वेदे न नलोपः । पाषाणमये स्त्रियां ङीप् । "शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत्" ऋ० ४।३०।२०। "लोके तु अश्ममयः । "अजमश्ममयश्चैव" इति मनुः । [गन्धद्रव्ये ।

**अश्मपुष्प** न० अश्मनः पुष्पमिव । शिलाजतुनि, शैलेये